| १) पिपीलिका | I) न पीडयामि त्वां तव शावकान् वा । |
| २) अर्जुनः | II) निबद्धे नीडे मम शावकाः सुप्ताः । |
| | III) आपत्काले त्वां ध्रुवं साहाय्यं करिष्यामि । |

**प्रश्नः५) सत्यं वा असत्यं लिखत ।**

१) अर्जुनः मृगयार्थं निबिडारण्यं जगाम ।
२) अर्जुनः कृतज्ञतां प्रकटितवान्।
३) अर्जुनः वृक्षशाखां छिनत्ति ।
४) सङ्कटग्रस्तोऽर्जुनः सूर्यखगं पिपीलिकाः च शपति।
५) पिपीलिकाभिः मार्गं निर्दिश्य अर्जुनः विशालवृक्षस्य समीपं नीतः ।

**प्रश्नः६) योग्यं वा अयोग्यं लिखत ।**

१) मूकप्राणिनोऽपि स्वोपकारं न विस्मरन्ति ।
२) सहायकान् प्रति कृतज्ञता प्रकटितव्या ।
३) प्रयोजनं विना अपि वृक्षशाखा छेत्तव्या ।
४) केषाम् अपि क्षुद्रप्राणिनां साहाय्यं न कर्तव्यम् ।

### B) *शब्दज्ञानम् ।*

**प्रश्नः1) विशेषण-विशेष्य अन्वितिः ।** ( मेलनम् )

| | | | |
|---|---|---|---|
| १) I) करुणार्द्रहृदयः | शाखासु । | १) I) जन्तवः | गुप्तचराः । |
| II) अपरस्य | अर्जुनः । | II) कोटरे | आच्छादितम् । |
| III) पर्णबद्धाः | वृक्षस्य । | III) आगताः | क्षुद्राः । |
| IV) एतासु | कन्दुकाकाराः । | IV) सर्वाङ्गम् | वचनम् । |
| | | | स्थिते । |

**C) *स्वमतप्रकटनम्  ( माध्यमभाषया ) ।***

प्रश्नः१) मानवजीवने प्राणिनां साहाय्यं कथं भवति ।

**D) *पृथक्करणम्  ।***

**स्तम्भपूरणम् ।**

| सूर्यखगस्य नीडम् । | पिपीलिकायाः गृहम् । |
|---|---|
| ------- | -------- |
| -------- | --------- |

( शाखायां निबद्धं, गृहे शावकाः राज्ञी सेवकाश्च, कन्दुकाकाराः, केवलं शावकाः)

**E) *क्रमसंयोजनम्* –  क्रमानुसारं  पुनर्लिखत ।**

१) I) सूर्यखगस्य निवेदनम् ।
II) अर्जुनस्य वनगमनम् ।
III) वृक्षशाखायाः छेदनम् ।
IV) पिपीलिकानां प्रार्थना ।

२) I) पिपीलिकानां साहाय्यम् ।
II) सूर्यखगस्य दिशादर्शनम् ।
III) गुप्तचराणाम् आगमनम् ।
IV) अर्जुनस्य गर्वयुक्तचिन्तनम् ।

**F) *जालरेखाचित्रम्*  -**

१)




२)




३) मञ्जूषातः शब्दान् चित्वा जालरेखाचित्रं पूरयत ।




( शस्त्रहीनः, दिशादर्शकः, अज्ञातवासी, परिव्राजकवेषधारी, आच्छादकः, सङ्कटमुक्तः)

**रचनात्मक शिक्षणप्रक्रिया**

**इतरांच्या संपर्कातून** | **कृती करुन** | **शोध घेऊन**

# सप्तमः पाठः । सप्ताश्चर्याणि ।

**A) *अवबोधनम्* --**

***प्रश्नः1) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।***

१) पिरॅमिडरचनार्थं जगति विख्यातः देशः -----। (मिस्रः/ रोमः/ चीनः)

२) तृतीयम् आश्चर्यं नाम -----।( मिस्रदेशः/पिरॅमिडरचना/गिझापिरॅमिडरचना)

३) वरदा ----- विषयस्य प्रकल्पं कर्तुम् इच्छति । (समाजशास्त्रस्य/सप्ताश्चर्यस्य/अन्तर्जालस्य)

४) पेट्रा-नगरी ------ देशे स्थिता । (मेक्सिको/ ब्राझिल/जॉर्डन)

५) रिडिमरशब्दस्य अर्थः -----। (पुत्तलः/क्रुसाकारः/ तारकः)

६) मायासंस्कृतेः प्रतीकरूपा नगरी नाम ------। (मेक्सिकोदेशः /पेट्रा/ चिचेन् इट्झा)

७) षष्ठाश्चर्यं ---- देशे विद्यते । (जॉर्डन /ब्राझिल/ मेक्सिको)

८) वरदायाः इ-सङ्केतः -------।

(वरदाऽसंस्कृत.com, <u>varada@sanskrit.com</u>, varada@sanskrit.com)

***प्रश्नः२) सत्यं वा असत्यं लिखत ।***

१) वरदा सप्ताश्चर्यविषये सङ्गणकीयपत्रं लिखति । २) चिचेन् इट्झा विश्वस्य सप्ताश्चर्यम् ।

३) तृतीयमाश्चर्यं मिस्रदेशे वर्तते । ४) रिडिमर नाम पुत्तलः ।

५) पेट्रा-नगरी जॉर्डनदेशे विद्यते ।

**B) *शब्दज्ञानम्*--**

***प्रश्नः1) चतुर्थपदं लिखत ।***

१) अनल्पाः : अल्पाः :: अनुपमेयम् : -----। २) न्यूनम् : अधिकम् :: प्रारभे : ------।

***प्रश्नः२) विशेषण-विशेष्य अन्वितिः।*** (गद्यांशतः २ विशेषणे चित्वा लिखत।)

१)-------,------ ॲम्फी थिएटरम् । २)-----,------- विशाला भित्तिः ।

***प्रश्नः३) विभक्त्यन्तपदानां चयनम् ।***

१) सप्तमीविभक्तेः एकवचनस्य रूपद्वयं लिखत ।

**C) *स्वमतप्रकटनं माध्यमभाषया ।***

प्रश्नः१) पत्रप्रेषणाद् अन्तर्जालपत्रम् एव सन्देशप्रेषणस्य प्रभावशालि साधनं विद्यते ।

**D) *पृथक्करणम्*** - जालरेखाचित्रम् ।

१) ताजमहालः

निर्माता | प्रयोजनम | प्रतीकम् | शोभा

२) सप्ताङ्कस्य वैशिष्ट्यम्

३) -----आश्चर्यम्

-नृपेण निर्मिता | विशाला भित्तिः | ----मयी

-----देशस्थिता

**E) *क्रमसंयोजनम्*** - क्रमानुसारं पुनर्लिखत ।

१) वरदां प्रति अन्तर्जालात् प्राप्तसंज्ञापनस्य प्रेषणम् ।

२) प्रभाते सन्देशप्रापणम् ।

३)समाजाशास्त्रविषयस्य प्रकल्पार्थं सप्ताश्चर्यविषये जिज्ञासा ।

४) सप्ताश्चर्यविषयकज्ञानार्थम् अन्तर्जालस्य उपयोगः।

=====***=====***======***======***======

# पाठनिहायाः कृतयः। पद्यविभागः।

## प्रथमः पाठः । गुरुवन्दना ।

**A) पृथक्करणम् ।**

1) *गुरुशब्दस्य विशेषणैः रेखाचित्रं पूरयत ।*




२) *मञ्जूषातः शब्दान् चित्वा उचितस्तम्भे लिखत ।*

| शिष्यः किम् इच्छति ? | शिष्यः किं न इच्छति ? |
|---|---|
| --------- | -------- |
| ---------- | --------- |

(धनम्, मौक्तिकम्, गुरुवन्दनम्, गुरुप्रसादनम्)

=====**=====**=====**=====**=====

## द्वितीयः पाठः । सुभाषितमाला १ ।

**A) *पृथक्करणम् ।***

१) मञ्जूषातः/पद्यांशतः उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत ।

बुधस्य उद्दिष्टम् ।

यदि सिद्धिप्रप्तिः -------- | यदि पित्तशमनम् ---------

सफलं भवेत् तर्हि

--------- अप्रस्तुतः। | --------- अप्रस्तुतः।

(शर्करया, दण्डः, साम्ना, पटोलः)

२)




३)



**B) शब्दज्ञानम् ।**

प्रश्नः१) चतुर्थं शब्दं लिखत ।

१) माता : जननी :: शिशुः : ------।   २) शत्रुः : मित्रम् :: रक्षति : -------।

=====*****======*****=======*****======*****======

## तृतीयः पाठः । नदीसमुद्रसंवादः ।

**A) पृथक्करणम् ।**

१) मञ्जूषातः विशेषणानि चित्वा स्तम्भं पूरयत ।

| द्रुमाः । | वेतसः । |
|---|---|
| ---------- | --------- |
| ---------- | --------- |

(कायिनः, कूलजः. समूलशाखाः, अल्पसारः)

२) पद्यांशतः उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत




**इ) वैतसी-वृत्तिं माध्यमभाषया स्पष्टीकुरुत ।**

=====*****==========*****==========*****=======

## चतुर्थःपाठः । आरोग्यं मूलमुत्तमम् ।

**A) शब्दज्ञानम्।**

**प्रश्नः1) सन्धिः।** (चतुर्थं पदं लिखत ।)

१) मुहुर्वारि : मुहुः + वारि :: अन्यैर्न : ------+-------।

२) पानान्न : पानात् + न :: तस्मान्नरः : -----+-----।

३) पिबेदभूरि : पिबेत् + अभूरि :: घर्षयेद्दन्तम् : ------ +-------।

**प्रश्नः1) मञ्जूषातः शब्दान् चित्वा अर्थद्वयं लिखत ।**

१) पयः     २) वासः     ३) मूलम्



(दुग्धम्, निवासः, जलम्, कारणम्. वस्त्रम्, वृक्षमूलम्)

**B) पद्यांशतः/मञ्जूषातः उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत ।**

१)




( रोगस्य, जीवितस्य, श्रेयसः, वैद्यस्य, धर्मस्य, मोक्षस्य )

**सातत्याने होत जाणाऱ्या बदलांमुळे शिक्षणाचे स्वरूप**

**साचेबंद न राहता प्रवाही बनते.**

२)




( धर्ममोक्षौ, वैद्यान्, अर्थान्, रुग्णालयम्, जीवितम्, श्रेयांसि)

३)




४)




=====***======***=====***=====***======

## पञ्चमः पाठः । सुभाषितमाला२ ।

**A) पद्यांशतः उचितान् शब्दान् चित्वाजालरेखाचित्रं पूरयत।**

१)

पात्र-अपात्रविवेकः ।

धेनुः — पन्नगः

------ खादति । तस्मात् ----- संजायते।  ----- पिबति । तस्मात् ------संजायते ।

२) बलवान्/ बली  निर्बलः  गुणवान्/ गुणी  निर्गुणः

---------  -------  ----------  -------

(पिकः, मूषकः, वायसः, गजः)

२)

प्रशंसनीयं शीलम् ।

----- ------

कर्मणा मनसा गिरा

३)

अचला श्रीः ध्रुवं विद्यते ।

=====**=====**======**=====**======

## षष्ठः पाठः । पॅरिसवर्णनम् ।

**A) *शब्दज्ञानम् ।***

***प्रश्नः१) चतुर्थं शब्दं लिखत ।***

१) गगनम् : नभः :: विख्यातम् : ------। २) प्रासादः : भवनम् :: शिरः : ------।

***प्रश्नः२) मेलनं कुरुत ।*** ( विशेषण-विशेष्य-अन्वितिः )

| | |
|---|---|
| I) सीनसरित् | ऐतिह्यम्/प्रासादः । |
| II) जोनदेवी | सेतुसुबद्धा । |
| III) सेण्ट्चेपलम् | अश्वाधिरुढा । |
| IV)न्यायभवनम् | आराधनमन्दिरम् । |

**B) *पृथक्करणम् ।* *पद्यांशतः उचितान् शब्दान् चित्वा जालरेखाचित्रं पूरयत ।***

१) पॅरिसनगरम् ।

नदी — न्यायमन्दिरम् — आराधनामन्दिरम् — मूर्तिः

२)

कण्ठभागे

सरित्समीपे — पारीनगर्याः — सुमार्गमध्ये

भवनसमीपे

**ज्ञान ही देवाण-घेवाण करता येईल अशी वस्तू नाही.**
**प्रत्येकाचे ज्ञान हे ज्याच्या त्याच्या अनुभवाशी बांधलेले असते**

## *लेखनकौशलम्* - वाक्यनिर्माणम् ।

कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।

| | | I ii iii |
|---|---|---|
| i अहं | गुणवत्तां | कामये ।/कामयसे ।/कामयते । |
| ii त्वं | वक्तुं | करोमि ।/करोषि ।/करोति । |
| iii सः | प्रशंसां | लभे ।/लभसे ।/लभते । |
| iii सा | प्रयत्नान् | न इच्छामि ।/ न इच्छसि ।/ न इच्छति । |

| | | |
|---|---|---|
| अस्ति | सः | क्रीडाकुशलः/क्रीडाकुशला |
| अस्मि | सा | अध्ययनशीलः/अध्ययनशीला |
| असि | अहम् | गायकः/ गायिका |
| आसीत् | त्वम् | संभाषणप्रवीणः/संभाषणप्रवीणा |

| | | |
|---|---|---|
| पत्रवाहकेन | जलं | आनीतम् । |
| तया | क्रीडनकं | कृतम् । |
| त्वया | भोजनं | लिखितम् । |
| अस्माभिः | पत्रं | क्रीतम् । |

| | | |
|---|---|---|
| मया | पत्रं | पठितम् । |
| त्वया | काव्यं | लिखितम् । |
| तया | साहसं | प्रेषितम् । |
| तेन | भोजनं | कृतम् । |

| | | |
|---|---|---|
| ग्रन्थपालः | सांस्कृतिककार्यक्रमे | कुशलः । |
| नर्तकः | वृत्तपत्रवाचने | मग्नः । |
| अध्यापकः | पुस्तकवितरणे | तत्परः । |
| कर्मचारी | सहायकार्ये | रतः । |

| | | |
|---|---|---|
| मधुमक्षिकाः | मधु | सञ्चिनोति । |
| वानराः | पुष्पात् पुष्पं | पिबन्ति । |
| भ्रमराः | फलानि | गुञ्जन्ति । |
| भल्लूकाः | वृक्षात् वृक्षं | उत्पतन्ति । |

| | | |
|---|---|---|
| संभाषणे | शिशुः | प्रयतते |
| गायने | युवकः | अनुकरोति |
| मूर्तिनिर्माणे | छात्रः | सफलीभवति |
| समारोहे | बालिका | आनन्दति |

| | | |
|---|---|---|
| पारितोषिकं | कस्मै | रोचते । |
| मिष्टान्नं | कुत्र | दातव्यम् । |
| पुस्तकं | केन | आनीतम् । |
| कमलं | किमर्थं | वर्तते । |

---

**शिक्षणातून भावी आयुष्यासाठी उपयुक्त आणि ज्यांचा विकास व्हायला हवा,अशा क्षमता आणि कौशल्ये-**

**१) स्वतःहून शिकता येणे.**

**२)शिकण्याचे मार्ग शोधता येणे.**

**३)विचार करता येणे.**

**४) भाषेचा वापर करता येणे.**

**५)मिळालेल्या अनुभवातून योग्य ते ज्ञान घेता येणे .**

**६)शोध घेता येणे .**

**७)पर्यायांची निवड करता येणे.**

**८)निर्णय घेता येणे .**

**९)कल्पनाशक्ति वापरणे.**

**१०)नवनिर्मिती करता येणे.**

**कोऽपि संस्कृतेन सम्भाषणम् अनायासेन कर्तुं शक्नोति । विश्वसत ।**
**आवलितः शब्दान् प्रयुज्य वाक्यरचनां कृत्वा अनुभवत ।**

| | | |
|---|---|---|
| अहं<br>त्वं<br>सः/सा | न/ सर्वम्<br>किञ्चित्/ किञ्चिदपि न<br>अधिकम्/अल्पम्<br>आरम्भात् अन्तपर्यन्तम्<br>पूर्णम्/ अर्धम् | जानामि ।<br>जानासि ।<br>जानाति । |

| | | |
|---|---|---|
| अहं त्वां<br>त्वं मां<br>स/सा मां | किमपि/ किमपि न<br>तत् /एतत् न<br>अधुना/श्वः<br>प्रभाते /सायङ्काले<br>गृहे/विद्यालये/कार्यालये/मार्गे | पृच्छामि/अपृच्छम्।<br>पृच्छ ।<br>पृच्छतु । |

| | | | |
|---|---|---|---|
| अहं<br>त्वं<br>सः/सा | अद्य /अधुना/नित्यं<br>प्रतिदिनम्<br>प्रतिप्रभातम्/प्रतिरात्रम् | शुद्धं/अशुद्धं स्पष्टं/अस्पष्टं<br>ध्यानपूर्वकम्/ वारं वारं<br>तूष्णीं /उच्चैः | पठामि ।<br>पठसि ।<br>पठति। |

| | | |
|---|---|---|
| अहं | ह्यः/पूर्वम्/गतसप्ताहे/सप्ताहात्/पूर्वम्/गतमासे/मासात् पूर्वम् | अपठम्। |

| | | |
|---|---|---|
| अहं | श्वः/ आगामि सप्ताहे/आगामि/मासे/आगामि सोमवासरे | पठिष्यामि। |

**दशमीकक्षा** ***त्रैमासिक-कृतिपत्रिकायाः प्रारुपम् ।*** **गुणाः २०**

***प्रथमःविभागः - गद्यम् ।***

प्रश्नः अ१) अवबोधनम् । (केऽपि २ कृती कुरुत।) २
(६०-८० शब्दपरिमितः गद्यांशः)
अ२) पृथक्करणम् । २
**प्रश्नः१** ब१) अवबोधनम् । (केऽपि २ कृती कुरुत।) २
(६०-८० शब्दपरिमितः गद्यांशः)
ब२) पृथक्करणम् । २

***द्वितीयः विभागः - पद्यम् ।***

**प्रश्नः**२अ१) अवबोधनम् । १
(४-८ पङ्क्तिपरिमितः पद्यांशः)
अ२) पृथक्करणम् / तात्पर्यलेखनम् । २
**प्रश्नः२ब)** श्लोकपूर्तिः। (केवलं १) २

***तृतीयः विभागः - व्याकरणम् ।***

**प्रश्नः३ (** केवलं २ उपप्रश्नाः लेखनीयाः ।)
**अ)नाम/सर्वनामपदानां पृथक्करणम् ।**
**(कोष्ठकपूर्तिः)।** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २
**ब) क्रियापदानां पृथक्करणम् । (कोष्ठकपूर्तिः)।**
( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २
**क) सन्धिं/ सन्धिविग्रहं कुरुत।**
( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

***चतुर्थ विभागः - लेखनकौशलम् ।***

प्रश्नः४**ब) कथापूर्तिः/परिच्छेदपूर्तिः-** (परिशिष्टम् १) ३
मञ्जूषातः उचितान् शब्दान् चित्वा ३ रिक्तस्थानानि पूरयित्वा कथां /परिच्छेदं पुनर्लिखत ।

**संविधान तक्ता**

| **विभागानुसारि गुणविभाजनम्** | | **उद्दिष्टानुसारि गुणविभाजनम्** | | **प्रकारानुसारि गुणविभाजनम्** | |
|---|---|---|---|---|---|
| गद्यम् | १२ | ज्ञानम् | ०५ | वस्तुनिष्ठ | २० |
| पद्यम् | १० | आकलनम् | ०५ | लघूत्तरी | १८ |
| व्याकरणम् | १० | उपयोजनम् | १५ | दीर्घोत्तरी | ०२ |
| लेखनम् | ०८ | कौशलम् | १५ | | **४०** |
| | ४० | | **४०** | | |

# महाराष्ट्र राज्य माध्यमिक तथा उच्च माध्यमिक शिक्षणमंडळ , पुणे

## संस्कृतम् संयुक्त–अभ्यासक्रमः।

दशमी कक्षा **कृतिपत्रिकायाःप्रारुपम्** गुणाः४०

अवधिःहोराद्वयम्

---

**प्रथमःविभागः – गद्यम् ।**

(अवबोधनम्, शब्दसम्पत्तिः)

**प्रश्नः १अ)** गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।

**अ१)**अवबोधनम्।(केऽपि २ कृती कुरुत।) २
(८०–१०० शब्दपरिमितः गद्यांशः)
**अ२)** स्वमतप्रकटनम् **माध्यमभाषया।(प्रश्नरचना संस्कृतभाषया)** २

**प्रश्नः१ब)** गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।
**ब**१)अवबोधनम् (केऽपि २ कृती कुरुत ।) २
(८०–१०० शब्दपरिमितः गद्यांशः)
**ब२)** पृथक्करणम् ( वृक्षरेखाचित्रम्/जालरेखाचित्रम्।/स्तम्भपूरणम्। ) २

**प्रश्नः१क)** गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।
**क१)** पृथक्करणम् ( केवलं क्रमसंयोजनम् ) २
(८०–१०० शब्दपरिमितः गद्यांशः)
क२) शब्दज्ञानम्(केऽपि २ कृती कुरुत।) २

- अवबोधनस्य कृतयः–I, ii, iii कृतयः प्रष्टव्याः।
  i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।
  ii)कः कं वदति । /पूर्णवाक्येन उत्तरं लिखत।
  iii) सत्यं वा असत्यं/योग्यं वा अयोग्यम् लिखत।
- शब्दज्ञानस्य कृतयः I, ii, iii प्रष्टव्याः।
  **i)** पर्यायशब्दाः/विलोमशब्दाः / भिन्नार्थकशब्दाः
  कृतयः –चयनम्/मेलनम्/समूहेतरपदस्य/चतुर्थपदस्य लेखनम् ।
  ii)विशेषण–विशेष्य– अन्वितिः।
  कृतयः –चयनम्/मेलनम् /चतुर्थपदस्य लेखनम् ।
  iii)धातुसाधित अव्ययानां चयनम्।(त्वान्त/ल्यबन्त/तुमन्त)/ विभक्त्यन्तपदानां चयनम्।

**द्वितीयः विभागः – पद्यम् ।**

अवबोधनं, शब्दसम्पत्तिः, रसग्रहणम्, स्मरणम् )

**प्रश्नः२अ)पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**अ१) पृथक्करणम् ।** (वृक्षरेखाचित्रम्/जालरेखाचित्रम्।/स्तम्भपूरणम्/क्रमसंयोजनम् । ) २

(४–८ पङ्क्तिपरिमितः पद्यांशः)

**अ२)** शब्दज्ञानम्। १

**प्रश्नः२ब)** पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।

(४–८ पङ्क्तिपरिमितः पद्यांशः)

**ब १)** अवबोधनम्। १

**२)** तात्पर्यलेखनम्/स्पष्टीकरणम् (माध्यमभाषया ) २

**क ) स्मरणम्।**

**क१)** श्लोकांशान् मेलयत। २

**क२)** श्लोकपूर्तिः (केवलं १) २

शब्दज्ञानम्–––पर्यायशब्दाः/विलोमशब्दाः / भिन्नार्थकशब्दाः

कृतयः –चयनम्/मेलनम्/समूहेतरपदस्य/चतुर्थपदस्य लेखनम् ।

अवबोधनम्– पूर्णवाक्येन उत्तरं लिखत।

स्पष्टीकरणम्– पद्यांशस्य मध्यवर्तिकल्पनां/ संकल्पनां माध्यमभाषया स्पष्टं कुरुत।

**तृतीयः विभागः – व्याकरणम् ।**

( ५ उपप्रश्नाः लेखनीयाः। उपप्रश्ने ६ पर्यायाः विद्यन्ते। तेषु ४ पर्यायाः लेखनीयाः)

**अ)नाम/सर्वनामपदानां पृथक्करणम्। (कोष्टकपूरणम् )** २

(प्राधान्येन दशमीकक्षायाः कृते नियोजितानि नामानि तथा एतत्
सर्व,अन्य,इदम्,अस्मद् युष्मद् सर्वनामानि)

**ब) क्रियापदानां पृथक्करणम्। ( कोष्टकपूरणम् )** २

(प्राधान्येन दशमीकक्षायाः कृते नियोजितानां धातूनां कालार्थ रुपाणि
तथा परोक्षभूतकालः, द्वितीयः भविष्यत्कालः)

**क)समासाः ।** २

कृती– समस्तपदानां /विग्रहवाक्यानां समासनामभिः सह मेलनम्/ रिक्तस्थानपूर्तिः

**ड) उपपदविभक्तिः।** २

कृतिः– उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।

**इ) सन्धिं/ सन्धिविग्रहं कुरुत।** २

कृतयः–चतुर्थपदं लिखत/पूर्वपदं लिखत/उत्तरपदं लिखत। उचितं पर्यायं चित्वा लिखत।

**फ) सङ्ख्यावाचकविशेषणानि।** ( व्याकरणविवेचनम् ७) २

कृतिः– रिक्तस्थानपूर्तिः।

**चतुर्थ विभागः – लेखनकौशलम् ।**

**अ)वाक्यनिर्माणम्।**

तालिकातः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत। ४

**ब)कथा /परिच्छेदपूर्तिः।**

मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा कथां पुनर्लिखत।
(परिशिष्टम् १) ४

# महाराष्ट्र राज्य माध्यमिक तथा उच्च माध्यमिक शिक्षणमंडळ, पुणे.
# संस्कृतम्। ( संयुक्त- अभ्यासक्रमः)

दशमी कक्षा **प्रतिदर्श-कृतिपत्रिका** गुणा :४०
अवधिः- होराद्वयम्।

---

प्रथमः विभागः गद्यम्।

**प्रश्नः१अ)गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**१) अवबोधनम्।**(केऽपि २ कृती कुरुत।)

**I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** १

द्वितीयं ------- दृष्ट्वा ------ पृष्टम्।(उद्विग्नमनसं/ शान्तचेतसं)( नागार्जुनेन/महाराजेन)

**II)कः कं वदति?** १

येन रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम्?

**III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत।** १

मार्गस्थरुग्णस्य समीपे स्थित्वा प्रथमः युवकः तस्य सेवां कृतवान्।

*एकदा राजानं गत्वा नागार्जुनः प्रार्थयामास,‘महाराज, कार्यबाहुल्याद् मत्कृते सहायकस्य आवश्यकता वर्तते।‘एतच्छ्रुत्वा द्वितीये दिने एव तं प्रति महाराजः द्वौ युवानौ प्रेषितवान्। तौ परीक्षितुं नागार्जुनः उभावपि एकैकं वस्तु दत्त्वा अवदत्,‘इदं गृहीत्वा स्वगृहं गच्छतम्। श्वः तस्मात् किमपि रसायनम् औषधं वा निर्माय आनयतामिति।*

*अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ। तदा तयोरेकः उक्तवान्, ’महाशय, अहं रसायनं कृत्वा आनीतवान्। पश्यतु भवानिति।‘*
*द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं,‘कथमिदानीम् अभाषमाणः तिष्ठसि? किं त्वया नानीतं रसायनम्?‘‘ तदाकर्ण्य स मन्दस्वरेण अवदत्, ‘आचार्य,ह्यः गच्छन् पथि आवामेकं रुग्णमपश्याव। तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान्। तस्य समीपे स्थित्वा तस्य सेवां कृतवान्। अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति।‘*
*तस्य सेवाभावं ज्ञात्वा नागार्जुनस्तमेव द्वितीयं युवकं सहायकत्वेन स्वीकृतवान्। येन रसायनं न आनीतमपि तस्मै किमर्थं सहायकपदं दत्तम्?इति राज्ञा पृष्टे सति*
*नागार्जुनोऽभणत्, एतेन रोगिणः सेवा कृता, मानवता दर्शिता। सेवाभावेन विना कथं चिकित्सको भवेत्? अतः अस्यैव नियुक्तिः मया कृता।‘*

**अ२)स्वमतप्रकटनम्। ( माध्यमभाषया)** **२**

नागार्जुनस्य निर्णयविषये ३०/४० शब्दपरिमितां भवत्प्रतिक्रियां लिखत।

**प्रश्नः१ब) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**ब१) अवबोधनम्।(केऽपि २ कृती कुरुत।)**

**I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।** १

कबड्डी इति भारतीया----- क्रीडा ------ विशेषरुपेण लोकप्रियतां गता।

(साङ्घिक / वैयक्तिक) (उत्तरभारते,महाराष्ट्रराज्ये)

II) **पूर्णवाक्येन उत्तरं लिखत।** १

तुकाराममहाराजस्य अभङ्गवचनेषु कबड्डीक्रीडा कैः नामाभिः निर्दिष्टा अस्ति?

III) वाक्यं **पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत।** १

वङ्गदेशे 'चेडुगुडु' दक्षिणभारते ' हुडू' उत्तरभारते कबड्डी इति नाम्ना विख्यातैषा क्रीडा।

प्राचीनकालतो विविधाः क्रीडाः प्रचलिताः। काश्चित् साङ्घिकाः काश्चिच्च वैयक्तिकाः। साङ्घिक-क्रीडासु कबड्डी इति भारतीया क्रीडा महाराष्ट्रराज्ये विशेषरुपेण लोकप्रियतां गता। 'हुतुतू'इति तस्याः अपरं नाम। तुकाराममहाराजस्य अभङ्गवचनेषु एषा क्रीडा 'हमामा, हुंबरी, हुतुतू' इत्यादिभिः नामभिः निर्दिष्टा। वङ्गदेशे 'हुडू' दक्षिणभारते 'चेडुगुडु' उत्तरभारते कबड्डी इति नाम्ना विख्यातैषा क्रीडा।

अस्यां क्रीडायां प्रतिसङ्घं द्वादश क्रीडापटवः भवन्ति। क्रीडाङ्गणे तु सप्त क्रीडापटव एव खेलन्ति।पञ्च क्रीडापटवो बहिस्तिष्ठन्ति। एष क्रीडाप्रकारो न केवलं पुरुषाणाम् अपि तु महिलानां कृतेऽपि प्रचलितोऽस्ति।

अनया कबड्डी क्रीडया शरीरचापल्यम् उत्साहः आक्रमकत्वं स्वसंरक्षणवृत्तिः शरीरसौष्ठवं च लभते। साहसं निरीक्षणशक्तिः योजकत्वं निर्णयक्षमता साङ्घिकी भावना एकात्मता देशाभिमानश्चैतैः नैकैर्गुणैः क्रीडकस्य व्यक्तित्वं विकसति।एतस्यै क्रीडायै कस्यापि क्रीडासाधनस्यावश्यकता नास्तीति महत्त्वपूर्णं वैशिष्ट्यम्।

**ब२ पृथक्करणम्।** २



**प्रश्नः१क) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**क१) पृथक्करणम्।** २

यथाक्रमं घटनाः लिखत।

१)पिपीलिकानां साहाय्यम्। २) सूर्यखगस्य दिशादर्शनम्।

३) गुप्तचराणाम् आगमनम्। ४)अर्जुनस्य कृतज्ञताप्रकटनम्।

दीर्घसमयोऽतीतः। अज्ञातकालवासे शस्त्रहीनः परिव्राजकवेषधारी अर्जुनः पुनरेकवारं तमेव वनप्रदेशं प्राविशत्। निबिडारण्ये पर्यटति तस्मिन् कुतश्चित् मनुजशब्द इव श्रुतिपथमागतः। कांश्चन गुप्तचरान् तं प्रति एवागच्छतः स दृष्टवान्। सः व्यचिन्तयत्,'अज्ञातवासकाले यदि कोऽपि मामभिजानीयात् तर्हि महापत्तिः उद्भवेत्। किं करणीयमधुना। इति चिन्तयतः तस्य पुरतः सूर्यखगः तत्रोपस्थितः। तेन स्वरवेण मार्गं निर्दिश्यार्जुनः कस्यापि विशालवृक्षस्य समीपं नीतः। वृक्षे महान् कोटरः आसीत्। कोटरं प्रविश्य अर्जुनः तत्रैव निभृतं स्थितः। तस्मिन् कोटरे स्थिते पिपीलिकाभिस्तस्य सर्वाङ्गं तथा आच्छादितं यथा अदृश्यः इवाभवत्। अर्जुनमन्विष्यन्तःतत्रागताः ते गुप्तचराः तं ज्ञातुमसमर्थाः ततः प्रतिनिवृत्ताः।

एवं सङ्कटमुक्तोऽर्जुनः सूर्यखगस्य पिपीलिकानां च वचनं स्मारं स्मारं तान् प्रति कृतज्ञतां प्रकटितवान्।

**क२)शब्दज्ञानम्।**

**चतुर्थं पदं लिखत।** पुरतः-पृष्ठतः, कृतज्ञता - --------। १/२

**समूहेतरं पदं लिखत।** आपत्तिः, विपत्तिः, सम्पत्तिः, १/२

**विशेषण-विशेष्य-अन्वितिः।**

गद्यांशे आगते अर्जुनस्य द्वे विशेषणे स्तः ------- , -------- । १

**धातुसाधित-अव्ययानां चयनम्।**

गद्यांशे आगते द्वे धातुसाधित ल्यबन्त-अव्यये लिखत। ------- , ------- । १

**द्वितीयः विभागः पद्यम्।**

प्रश्नः२) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। २

**अ१)पृथक्करणम्।**



एकैकं घर्षयेद्दन्तं मृदुना कूर्चकेन च।
दन्तशोधनचूर्णेन दन्तमांसन्यबाधयन्।।१।।
अत्यम्बुपानान्न विपच्यतेऽन्नं निरम्बुपानाच्चस एव दोषः।
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि।।२।।
भोजनान्ते पिबेत्तक्रं वासरान्ते पिबेत् पयः।निशान्ते च पिबेद्वारि त्रिभी रोगो न जायते।।३।।

**अ२)शब्दज्ञानम्।**

I)दिनान्ते शब्दस्य कृते श्लोके आगतः पर्यायशब्दः अस्ति --------। १

II)अल्पम् शब्दस्य कृते श्लोके आगतः पर्यायशब्दः अस्ति --------।

**ब) पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।**

**ब१) तात्पर्यलेखनम्**

प्रथम/ द्वितीय सुभाषितस्य तात्पर्यं माध्यमभाषया लिखत। २

साम्नैव यत्र सिद्धिर्न तत्र दण्डो बुधेन विनियोज्यः।
पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन।। १।।

शनैः शनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम्।
रसायनमिव प्राज्ञैर्हेलया न कदाचन।।२।।

शस्त्रैर्हतास्तु रिपवो न हता भवन्ति
प्रज्ञाहताश्च नितरां सुहता भवन्ति।
शस्त्रं निहन्ति पुरुषस्य शरीरमेकम्
प्रज्ञा कुलं च विभवं च यशश्च हन्ति।।३।।

**ब२) अवबोधनम्।**

**पूर्णवाक्येन उत्तरं लिखत।** १

प्रज्ञया पुरुषस्य किं किं हन्यते?

**क) स्मरणम्।**

**क१)श्लोकांशान् मेलयत।** २

| | |
|---|---|
| नयविक्रमसंयोगस्तत्र | न मूषकः। |
| गजश्च सिंहस्य बलं | न वायसः। |
| पात्रापात्रविवेको हि | श्रीरचला ध्रुवम्। |
| पिको वसन्तस्य गुणं | यत्रालस्यविहीनता। |
| | धेनुपन्नगयोरिव। |

**क२)श्लोकपूर्तिः।**

**सुभाषितं शुद्धं पूर्णं च लिखत।** २

केवलं १

अद्रोहः----- प्रशस्यते।।

उपानहौ च ------च।।

## तृतीयः विभागः व्याकरणम्।

**प्रश्नः३)यथानिर्देशं कृतीः कुरुत।** ( ५ उपप्रश्नाः लेखनीयाः ।)

**अ)नाम/सर्वनामपदानां पृथक्करणम्। (कोष्टकपूरणम् )**( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः)२

| | चतुर्थी एकवचन<br>Dative singular | सप्तमी एकवचन<br>Locitive Singular | द्वितीया बहुवचन<br>Accusative plural |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(भगवते , अस्याम्, सर्वस्मै, वाचि , पक्षिणः,एतानि)

**ब) क्रियापदानां पृथक्करणम्। ( कोष्टकपूरणम् )** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

| द्वितीयभविष्यत्कालः<br>II Future Tense | **परोक्षभूतकालः**<br>**Perfect Past** | **प्रथमभूतकालः**<br>**Imperfect Past** | **विध्यर्थः**<br>**Potentia** | **आज्ञार्थः**<br>**Imperative** | **वर्तमानकालः**<br>**Present Tense** |
|---|---|---|---|---|---|
| | | | | | |

(जगाम, दद्याम् ,करिष्यामः,अशक्नवम्,जानानि , तन्वे)

**क)समासाः** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

विग्रहवाक्यानां समासनामभिः सह मेलनम्।

I)धेनुः च पन्नगःच। उपपद तत्पुरुषः।

---

II)न विद्यते असूया यस्य सः। कर्मधारयः।

III)कालं जानाति इति। षष्ठी तत्पुरुषः।

IV)चन्द्रस्य ज्योत्स्ना। अव्ययीभावः।

V)अधिकं मूल्यम्। नञ् बहुव्रीहिः।

VI)स्थानम् अनतिक्रम्य। इतरेतर द्वन्द्वः।

द्विगुः।

---

**ड) उपपदविभक्तिः** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत।

I)-------- विना पापान्मुक्तिरशक्या। (प्रायश्वित्तं/ प्रायश्चित्तस्य)

II)वृक्षः ----- फलानि यच्छति। (जनान्/ जनेभ्यः)

III)परमेश्वरः भक्तान् ------ रक्षति। (विघ्नात्/विघ्नेन)

IV)---- उभयतः क्षेत्राणि सन्ति। (नद्याः/ नदीम्)

V)यात्री ----- गतवान्। (सागरतीरं/सागरतीरः)

VI)------- नमः।(विद्यादेव्यै/ विद्यादेवीं)

इ) **सन्धिं/ सन्धिविग्रहं कुरुत।** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

रिक्तस्थानपूर्तिः।

i)तटभ्रमैश्च= -----+ च। ii) युष्माभिरिह = युष्माभिः + ----।

iii)----- = मुहुः+ मुहुः। iv) ------- = कः + अर्थः।

v)अस्मिन् + एव= -----। vi) चिदानन्दः = ---- + आनन्दः।

**फ) सङ्ख्यावाचकविशेषणानि।** ( ६ पर्यायेषु ४ पर्यायाः लेखनीयाः) २

रिक्तस्थानपूर्तिः।

i)कर्मणः---- फले पापं तथा पुण्यम्।(द्वौ/द्वे)

ii)मम जन्मदिवसे मातामही ----- पक्वान्नानि करोति। (5)

iii)श्रीकृष्णः देवक्याः ----- अपत्यम्। (8th)

iv)शाकुन्तलस्य ----- अङ्कः अतीव सुन्दरः।(चत्वारः/चतुर्थः)

v)वर्षे ------षण्मासिकं प्रकाशितं भवति।

vi)देवः मानवः दानवः च प्रजापतेः ----- पुत्राः। (3)

## चतुर्थ विभागः – लेखनकौशलम् ।

**प्रश्न४)अधोनिर्दिष्टे कृती कुरुत।**

**अ)वाक्यनिर्माणम्**

तालिकातः शब्दान् चित्वा **अर्थसङ्गतानि** ४ वाक्यानि लिखत। ४

| | | |
|---|---|---|
| पिपीलिका | जलं | धारयति |
| गजः | गणवेशं | पिबति |
| अश्वः | इक्षुदण्डान् | इच्छति |
| बालकः | चणकान् | खादति |

**ब)कथा /परिच्छेदपूर्तिः**

मञ्जूषातःउचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा कथां पुनर्लिखत। ४

महाराष्ट्रराज्ये रायगडः नाम सुविख्यातः दुर्गः। एकदा हिरकणी दुग्धविक्रयार्थं रायदुर्गं ----- उत्सुका। किन्तु तस्याः शिशुः अद्यापि न सुप्तः।यदा दोलरूढः शिशुःसुप्तः तदा हिरकणी ---- प्रस्थिता।दुर्गे दुग्धविक्रयार्थम् अधिकः कालक्षेपः अभवत्।सूर्ये अस्तमिते दुर्गद्वाराणि पिहितानि। आवृत्तं महाद्वारं ---- सा द्वारोद्घाटनाय रक्षापुरुषं प्रार्थयत। परं सूर्योदयसमये एव द्वारम् उद्घाटनीयम् इति ------ आज्ञाम् अनुसृत्य सः तद् न उद्घाटितवान्। अस्वस्थचित्ता सा तस्ततःअभ्रमत्।तस्याः नयनयोः पुरतः केवलं तस्याः शिशुः आसीत्।पुत्रस्नेहेन स एकस्मात् तटात् अवतरणं प्रारभत।सुदूरम् उपप्लुत्य भूमौ न्यपतत्। गृहम् अगच्छत् च।शिवभूपेन तस्याः न केवलं प्रशंसा कृता तस्यै पारितोषिकमपि दत्तम्।

**(गन्तुम्. शिवभूपस्य,विलोक्य, दुर्गम्)**